## प्रत्ययस्य लुक्श्लुलुपः । (६१/२६०)

अदर्शनम् इति वर्तते । प्रत्ययादर्शनस्य लुक्, श्लु, लुप् इत्येताः सञ्ज्ञा भवन्ति । अनेकसञ्ज्ञाविधानाच्च [1]तद्भावितग्रहणमिह विज्ञायते । [2]लुक्सञ्ज्ञाभावितं प्रत्ययादर्शनं लुक्सञ्ज्ञं भवति, [3]श्लुसञ्ज्ञाभावितं श्लुसञ्ज्ञं भवति, लुप्सञ्ज्ञा[4]भावितं [5]लुप्सञ्ज्ञं भवति । तेन सञ्ज्ञानां सङ्करो न [6]भवति । विधिप्रदेशेषु [7]च भाविनी सञ्ज्ञा [8]विज्ञायते । अत्ति (२.४.७२/२४२३) । जुहोति (२.४.७५/२४८९) । वरणाः[9] (४.२.८२/१३०१) । प्रत्ययग्रहणम् किम् ? अगस्तयः । कुण्डिनाः (२. ४. ७०/११५२) । लुक्श्लुलुप्प्रदेशाः–'लुक्तद्धितलुकि' (१.२.४९/१४०८),'जुहोत्यादिभ्यः श्लुः' (२.४.७५/२४८९), 'जनपदे लुप्' (४.२.८१/१२९३) इत्येवमादयः ॥

## प्रत्ययलोपे प्रत्ययलक्षणम् । (६२/२६२)

प्रत्ययनिमित्तं कार्यमसत्यपि प्रत्यये कथं नु[10]नाम स्यात् इति सूत्र[11]मिदमारभ्यते । प्रत्ययलोपे कृते[12] प्रत्ययलक्षणं [13]प्रत्ययहेतुकं कार्यं भवति । अग्निचित्, [14]सोमसुत्, [15]अधोक् इत्यत्र सुप्तिङोः लुप्तयोः 'सुप्तिङन्तं पदम्' (१.४.१४/२९) इति पदसञ्ज्ञा भवति । अधोक् इति दुहेः लङि [16]तिपि शब्लुकि तिलोपे[17] घत्व[18]-भष्भाव-जश्त्व- चर्त्वेषु [19]कृतेषु रूपम् । प्रत्यय[20] इति वर्तमाने पुनः प्रत्ययग्रहणं किम् ? कृत्स्नप्रत्ययलोपे यथा स्यात् । इह मा भूत्––आघ्नीय[21] । सङ्ग्मीय[22] (का.सं. ६.९) । हनिगम्यो[23]र्लिङात्मनेपदे 'लिङः सलोपोऽनन्त्यस्य' (७.२.७९/२२११) इति [24]सीयुट्सकारलोपः [25]प्रत्ययैकदेशलोपः, तत्र[26] [27]प्रत्ययलक्षणेन झलि इत्यनुनासिकलोपो न भवति (६.४.३७/२४२८) । प्रत्ययलक्षणम् इति किम् ? रायः [28]कुलं रैकुलम् । गवे हितम् गोहितम् (म.भा. १. १६१) । आयवादेशौ न भवतः [29]वर्णाश्रयत्वात् ॥

## न लुमताऽङ्गस्य । (६३/२६३)

पूर्वेण अतिप्रसक्तं[30] प्रत्यय[31]लक्षणम् इति विशेषे प्रतिषेधः उच्यते । लुमता [32]शब्देन लुप्ते[33] प्रत्यये यदङ्गं, तस्य प्रत्ययलक्षणं कार्यं न भवति । गर्गाः[34] । मृष्टः । जुहुतः । [35]यञ्शपोर्लुमता लुप्तयोरङ्गस्य [36]वृद्धिगुणौ न भवतः । लुमता इति किम् ? कार्यते । हार्यते (६.४.५१/२३१३) । अङ्गस्य इति किम् ? पञ्च । सप्त[37] । पयः । साम[38] ॥

## अचोऽन्त्यादि टि । (६४/७९)

अचः इति निर्धारणे षष्ठी । जातावेकवचनम् । अचां सन्निविष्टानां योऽन्त्योऽच् तदादि [39]शब्दरूपं टिसञ्ज्ञं भवति । अग्निचित्–इच्छब्दः । सोमसुत्–उच्छब्दः । आताम्, आथाम्–आम्शब्दः । पचेते, पचेथे । टिप्रदेशाः–'टित आत्मनेपदानां टेरे' (३.४.७९/२२३३) इत्येवमादयः ॥

---

1. तद्भावितस्य फ. 2. लुक्संज्ञया क.ड.फ.ह. 3. श्लुसंज्ञया क.ड.फ, प्रत्ययादर्शनं इत्यधिकम् ह. 4. लुप्सञ्ज्ञया क. 5. प्रत्ययादर्शनम् इत्यधिकम् ह. 6. भविष्यति इति क.ड. 7. च नास्ति फ, भाविनीयं अ. 8. विज्ञास्यते ह. 9. वरुणाः ह. 10. नु नास्ति ग. ब. फ, यथा स्यात् ह. 11. इदं नास्ति अ. ग. ड. 12. सति ग. फ, प्रत्ययलोपे तु ह. 13. प्रत्ययहेतुकार्यं ह. 14. नास्ति ग. फ. ह. 15. अधूमः ह. 16. तिप्शपो लुकि ड. 17. तिपो लुकि ड. 18. धत्व ड. 19. कृतेषु नास्ति ग. 20. प्रत्ययग्रहणेऽनुवर्तमाने क. ड. 21. आघ्नीत ग. ड. फ. ई. 22. सं रायस्पोषेण ग्मीय (का. सं. ६.९),संग्मीत क. 23. लिङि आत्मनेपदे ड. 24. सीयुटः क, सीयुट्सकारस फ. 25. प्रत्ययैकदेशस्य फ. ह. 26. अत्र ग. 27. प्रत्ययलक्षणेऽङ्गुली क, प्रत्ययलक्षणे ड. 28. कुशलं, रैकुशलं क, रायः कुलम् नास्ति ग. 29. आश्रयत्वात् ग. 30. इति फ, पूर्वेण इति प्रसक्तं ग, पूर्वेणातिप्रसक्तस्य विशेषप्रतिषेध उच्यते ह. अ. क. 31. प्रत्यय नास्ति फ. 32. शब्देन नास्ति फ. ह. 33. लुप्ते नास्ति ह. 34. विदाः ह. 35. शब्यञोः अ. क. 36. गुणवृद्धी अ.ब.क.ड.इ.फ.ग. 37. नव, दश फ, नव ग. 38. सामः ग. 39. शब्दस्वरूपं क.